# Shri Bhringidevacharyapranitah Sadhananirnayah

# શ્રીભૃઙ્ગિદેવાચાર્યપ્રણીતઃ સાધનનિર્ણયઃ

## Document Information

Text title : Shri Bhringidevacharyapranitah Sadhananirnayah

File name : sAdhananirNayaHbhRRingidevAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : bhRiNgidevAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# Shri Bhringidevacharyapranitah Sadhananirnayah

# શ્રીભૃઙ્ગિદેવાચાર્યપ્રણીતઃ સાધનનિર્ણયઃ

નત્ત્વા ગુરું ચ શ્રીરામાનન્દં ભાષ્યવિધાયકમ્ ।
સત્સાધનપ્રબોધાય કુર્વે સાધનનિર્ણયમ્ ॥ ૧॥

શરારીત્માભિમાનં હિં પુંસોઽવિદ્યા મતા બુધૈઃ ।
સ્વકીયત્વાભિમાનં ચાપ્યસ્વકીયેષુઃ વસ્તુષુ ॥ ૨॥

તતો દેહપ્રવેશશ્ચ તતોઽવિદ્યા પ્રજાયતે ।
પ્રવૃત્તં વર્તતે ચેદં ચક્રમનાદિકાલતઃ ॥ ૩॥

અપારસ્ય ભયસ્યાત્ર સ્મૃતા હેતુર્મતા ચ યા ।
તાપત્રયાનુભૂતિઃ સા જીવસ્ય તત એવ હિ ॥ ૪॥

અદૃષ્ટોપાયતશ્ચૈવ તસ્ય નાશો ન ચાન્યથા ।
શ્રીરામાનુગ્રહઃ શાસ્ત્રે સ ચોપાયઃ પ્રકીર્ત્તિતઃ ॥ ૫॥

કર્મજ્ઞાનાઙ્ગિની ભક્તિસ્તદ્ધેતુત્વેન નિશ્ચિતા ।
વર્ણાશ્રમધર્મરૂપં તત્ર કર્મ મતં બુધૈઃ ॥ ૬॥

સ્વભાવયોસ્તથૈવાત્ર જીવેશયોઃ સ્વરૂપયોઃ ।
જ્ઞાનં મતં ચ ભક્ત્યઙ્ગં સમ્પાદ્યં તદ્ધિ સદ્ગુરોઃ ॥ ૭॥

શેષો દેહાદિભિન્નશ્ચ જીવોઽણુશ્ચેતનો મતઃ ।
શેષી દેહી ચ સર્વસ્ય ચેતનો વિભુરીશ્વરઃ ॥ ૮॥

સાધનસપ્તકાદ્ રામે પ્રીતિઃ સર્વાધિકા ચ યા ।
સા હિ ભક્તિતયા પ્રોક્તા રામાનુગ્રહકારણમ્ ॥ ૯॥

રામસ્ય કૃપયા જીવઃ સાયુજ્યં લભતે ધ્રુવમ્ ।
પુનરાવર્ત્તતે નૈવ યલ્લબ્ધ્વાઽત્ર ભવામ્બુધૌ ॥ ૧૦॥

શ્રીમદ્ભડઙ્ગિદેવાર્યદ્વારપીઠેશનિર્મિતઃ ।
સાધનબોધકો ભૂયાદેષ સાધનનિર્ણયઃ ॥ ૧૧॥

ઇતિ શ્રીભૃઙ્ગિદેવાચાર્યપ્રણીતઃ સાધનનિર્ણયઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mrityunjay Pandey

---

*Shri Bhringidevacharyapranitah Sadhananirnayah*
pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*